ISSN 2349-5928
Vol.2 No.2
July 2015-Dec. 2015

# HUMANITIES & SOCIAL SCIENCE REVIEW

*An International Peer Reviewed Refereed Journal*

Editor -in -Chief
Dr. Vinay Kumar Pandey

VYAS PRAKASHAN
V A R A N A S I

ISSN: 2349-5928

# HUMANITIES AND SOCIAL SCIENCE REVIEW

*(An International Peer Reviewed Refereed Journal)*

**Editor in Chief**

*Dr. Vinay Kumar Pandey*
Associate Professor
Faculty of S.V.D.V.
Banaras Hindu University, Varanasi

| | | | |
|---|---|---|---|
| 12. | संगीत शिक्षा का सामाजिक महत्व एवं उद्देश्य | श्वेता राय | 77 |
| 13. | नैषधीयचरितम् महाकाव्य में पाककला | स्वीटी कुमारी | 82 |
| 14. | उर्दू ग़ज़ल : परिभाषा और विकास | अंकित मिश्रा | 87 |
| 15. | स्मृति तथा धर्मशास्त्र में आश्रम व्यवस्था एवं संस्कार | अवनीश कुमार सिंह | 89 |
| 16. | राष्ट्रोन्नयन में शुक्ल यजुर्वेद का योगदान | नवनीत कुमार पाण्डेय | 97 |
| 17. | हिन्दी के आदिवासी जीवन केन्द्रित सामाजिक यथार्थ और उपन्यास | टीकम चन्द मीना | 102 |
| 18. | मध्य गांगेय क्षेत्र में सांस्कृतिक परिवर्तन की प्रक्रिया (प्रारम्भ से ऐतिहासिक युग तक) | विजेन्द्र राय | 111 |
| 19. | मध्य गंगाघाटी की उत्तरी काली ओपदार पात्र परम्परा | डॉ प्रज्ञा मिश्रा | 121 |
| 20. | तेन त्यक्तेन भुञ्जीथाः | डॉ. मेहन्द्र कुमार अंदवे | 126 |
| 21. | भूमि परीक्षण | सुनील कुमार त्रिपाठी | 131 |
| 22. | भागवत वर्णित माया–निवृत्ति के उपाय | डॉ0 चन्द्रशेखर सिंह | 139 |
| 23. | ज्योतिषे पृथिव्याः स्वरूपवर्णनम् | अश्विनी पाण्डेयः | 146 |
| 24. | याजुष्ज्योतिषम् | डॉ0 शत्रुघ्नत्रिपाठी | 153 |
| 25. | वेदेषु पर्यावरणचिन्तम् | जानकीशरणः दासः | 162 |
| 26. | पुराणेषु विश्वबन्धुत्वभावना | डॉ. अमृतलालः भोगायता | 169 |
| 27. | मित्रधर्ममुदीरयेत् | डॉ. पङ्कजकुमार एस्. रावलः | 174 |
| 28. | अभिज्ञानशाकुन्तले नृपस्य सङ्कल्पना | डॉ. डायालाल मालदेभाई मोकरिया | 179 |
| 29. | संस्कृतसंस्कारैरू समाजरक्षणे योगदानम् | बी. उमामहेश्वरी | 183 |
| 30. | पंचमहायज्ञानां सम्पादनविधानम् | उमा शंकर झा | 187 |
| 31. | नैतिकमूल्योत्थाने संस्कृतभाषायाः योगदानम् | डा0 श्यामधर तिवारी | 192 |

# मित्रधर्ममुदीरयेत्

**डॉ.पङ्कजकुमार एस्. रावलः †**

मानव एकः साहजिको जीवः सः समाजात् भिन्नः स्थातुं न शक्नुयात् । जगति स्थातुं कुटुम्बिनां परिवारसदस्यानां स्नेहिनां, मित्राणां, साहचर्यं सामीप्यं सर्वदैव प्रतिभाति । अत्र यदा कश्चित् जीवः मानवशरीरं धृत्वा संसारं प्रविशति तदा केचन सम्बन्धाः रक्तबद्धा भवन्ति । केचन च सम्बद्धाः अनुरक्तबद्धाः भवन्ति । रक्तसम्बन्धे मानवस्य न किमपि चलति । कुटुम्बपरिवाराणां यः सम्बन्धः सः रागविरागेणाऽपि चालनीयः भवति । तत्र मातापितृणां प्राप्तिः भ्रातृभगिनीनां प्राप्तिः वा अन्यत् कुटुम्बिजनानां प्राप्तिः अस्माकं रुच्यनुगुणं न भवति । किन्तु परमात्मना एकं सम्बन्धं योजयितुं स्वतन्त्रता अस्मभ्यं प्रदत्ता । स सम्बन्धः नाम मित्रधर्मः । पशवः भवन्ति वा पक्षिणः भवन्ति सहवासिनं विना ते स्थातुं न शक्नुवन्ति । यथा -

**मृगाः मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिः तुरङ्गास्तुरङ्गैः ।**
**मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यम् ॥** (सु.र.भा.)

जीवने योऽविचार्य अस्माकं हितं चिन्तयति मङ्गलं च विदधाति तथा चास्मान् सर्वाभ्यः दिग्भ्यः रक्षति यत्र च भाषायाः प्राधान्यं न अपितु भावप्रधानता भवति स एव मित्रधर्मः -

**कराविव शरीरस्य नेत्रयोरिव पक्ष्मणि ।**
**अविचार्यप्रियं कुर्यात् तन्मित्रं मित्रमुच्यते ॥ (सु.र.सा.)**

मित्रधर्मस्य त्रयः गुणाः भवन्ति । यथा सत्वरजस्तमांसि ययोर्द्वयोः शीलं समानं ययोर्द्वयोः प्रकृतिस्समाना ययोर्द्वयोर्व्यसनं समानं तयोर्द्वयोरेव मैत्री वा मित्रधर्मः स्थायीभावपूर्णः भवति नान्यथा संचारिभावः । अत एव तत्र भवता राजर्षिभर्तृहरिणा स्वनीतिशतके उदीरितम् यत्-

**आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।**
**दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥ (नीतिशतकम्)**

यदि जीवने कश्चित् सखा भवति चेत् जीवनं सोर्जं मधुरतापूर्णं सहजतया सरलतया च भवति । **"समानानि खानि पानि च तानि इन्द्रियाणीति सखा"** सखा शब्दस्य व्युत्पत्या एव ज्ञानं भवति यत् मित्रे समानतायाः प्रथमा आवश्यकता भवति । अस्य सम्बन्धस्य महत्त्वं बहुधा बहुभिः उदीरतम् केनचित्

---

† आसि.प्रोफेसर, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, सञ्चालित संस्कृतकोलेज, वेरावल, गुजरात

लिखित्वा दर्शितम् केनचिच्च आचरणेन प्रदर्शितम् । पुनरेकवारं भर्तृहरिं स्मृत्वा कथयामि यत् मित्रधर्मः नीरक्षीरमिव भवति ।

**संतप्ता यदि संस्थितस्य पयसो नामापि न श्रूयते**
**मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।**
**स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते**
**प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो जायते ॥**

मित्राय एकः शब्दः **"सुहृद्"** इत्यपि वर्तते । **"सुष्ठु समानं सरलं सुमधुरं हृदयं यस्यास्ति इति- सुहृद्"** । भगवता रामेणापि मित्रशब्दस्यार्थः कृतः वर्तते । यः मित्रधर्मं जानाति सः एव मित्रशब्दस्य व्युत्पत्तिं कर्तुं शक्नुयात् । **"अमीते त्रायते इति मित्रम्"** । दुःखात् दुःखेभ्यः वा त्रायते रक्षति तन्मित्रम् । एकान्तजीवनेऽपि यस्य सामीप्यं परमावश्यकं भवति तद् मित्रम् । मित्रशब्दः नपुसंकलिङ्गे अत अवास्ति यत् तत्र पुल्लिङ्गस्य स्त्रीलिङ्गस्य नपुंसकलिङ्गस्य च समेषां परस्पराधिकारः भवति ।

इदानीं कानिचित् मित्रधर्मस्योदाहरणानि वयं पश्यामः येन उपरि निर्दिष्टं वाक्यं सुस्थिरं भवेत् सुस्पष्टं च भवेत्-रामसुग्रीवयोः, रामकेवटयोः, कृष्णार्जुनयोः, कृष्णसुदाम्नोः, कृष्णद्रोपद्योः, दुर्योधनकर्णयोः ।

मित्रधर्मे कर्तव्यपरिपालनं महत्त्वपूर्णं विद्यते । यदा एकं मित्रं दुःखे निमग्नं संसारान्धकारेण आच्छादितं भवति सर्वं शून्यं च प्रतिभाति तस्मिन् समये **"तमसो मा ज्योतिर्गमय"** इति वाक्यं चरितार्थं कर्तुमस्माकं जीवनं प्रविशति तदेव मित्रम् । मित्रस्य परीक्षा विपत्तिकाले भवति । तदर्थं भर्तृहरिणा कथितं यत्- **"तन्मित्रमापदि सुखे च समक्रियं यत्"** इति यत् विश्वस्मिन् एकापि भाषा तादृशी न स्यात् यस्यां भाषायां मित्रस्य महिमा न विवर्णितः स्यात् ।अत एव केनचित् सुभाषितकारेणापि प्रोक्तं यत्-

**ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।**
**भुङ्क्ते भोजयते चैव षड्विधं मित्रलक्षणम् ॥**
**एतानि षड्लक्षणानि यत्र प्रत्यक्षीभूतानि तद् मित्रं जानीयात् ।**
**यस्य चित्रं चरित्रं पवित्रं च प्रतिभाति तदेव मित्रम् ।**
**पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान्प्रकटीकरोति ।**
**आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥**

**(नीतिशतकम्)**

सन्मित्रेण शौर्यप्राप्तिः स्वतः भवति । यथा रामसुग्रीवयोः मित्रधर्मः रावणस्य लङ्कायाः नाशं कर्तुं सर्वथा समर्थः । कृष्णार्जुनयोः मैत्री एव कुरुक्षेत्रेपि धर्मक्षेत्रमिव प्रतिभाति । एकं पुस्तकम् एकं मित्रवत्

प्रतिभाति किन्तु एकं मित्रं संपूर्णपुस्तकालयमिव प्रतिभाति । मित्रधर्मे आकाशपातालयोरपि अन्तरं सन्निकटे भवति । यथा श्रीकृष्णः गगनाकारः सुदामा पातालाकारः तथापि तयोर्मध्ये करुणावरुणालय इव सामीप्यं सान्निध्यं सुमधुरतापूर्णं मित्रत्वं सर्वविदितम् । यजुर्वेदेप्युक्तम्–**"मित्रस्य चक्षुषा समीक्षामहे"** इति मित्रता धर्मे एकेन मित्रेण अपरस्य मित्रस्य हृदि स्थानं प्राप्तुं तावत् सारल्यं नास्ति तत्पूर्वम् आदौ कण अवतरणीयं भवति । द्वयोर्मित्रयोर्मध्ये धर्मः सेतुरूपः भवति तदानीमेव मित्रधर्मः चरितार्थः भवति द्वयोर्मित्रयोः केन्द्रस्थाने धर्मः स्यात्, नीतिः स्यात्, सदाचारः स्यात्, चारित्र्यं स्यात्, गुणत्वं स्यात्, पावित्र स्यात् तदानीम् एव –

**"तत्र श्रीविजयो भूतिर्ध्रुवानीतिर्मतिर्मम ॥" (गीताजी)**

एकेन मित्रधर्मज्ञेन तु तावत् कथितं यत्–

**शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम् ।**

**केन सृष्टमिदं रत्नं मित्रमित्यक्षरद्वयम् ॥ (सु.र.सा.)**

मित्रधर्मः शोकमोहभयापहः भवति अर्थात् शोकः भूतकालस्य भवति मोहः वर्तमानकालस्य भवति भयः भविष्यत्कालस्य भवति किन्तु जीवने यदि कश्चित् सन्मित्रं भवति चेत् न भूतस्य शोकः वर्तमानस्य मोहः नैव भवति भयं भविष्यस्य च ।

**गिरौ मयूराः गगने पयोदा लक्षान्तरेऽर्कश्च जलेषु पद्मम् ।**

**इन्दुर्द्विलक्षं कुमुदस्य बन्धुः यो यस्य मित्रं न हि तस्य दूरम् ॥**

अनेन श्लोकेनापि ज्ञानं भवति यत् मैत्रीधर्मे स्थानं बाधात्मकं न भवति । अन्तरं कियदपि स्यात् यस्य मित्रस्य स्थानं हृदि वर्तते तेन मयूरपयोदयोरिव भास्करपङ्कजयोरिव कुमुदचन्द्रयोरिव देशकालधर्मोऽपि बाधाकरः न भवति ।

मित्रधर्मः हृदा भवति तत्र सम्पत्तिः स्थानं कुलं, धनं वयः ज्ञानं रूपं लिङ्गं वंशः पौरुषत्वं देशः कालश्च किमपि मध्ये नागच्छति मित्रतायाः प्रेमप्रवाहे एतत्सर्वं प्रवाहितं भवति ।

**दूरस्थोऽपि न दूरस्थः यो यस्य हृदि वर्तते ।**

**यो यस्य हृदये नास्ति समीपस्थोऽपि दूरतः ॥ (सुभाषितपुष्पमाला)**

सुभाषितेष्वपि मित्रधर्मः बहुधा व्यक्तः भवति । मित्रजीवने या या आदर्शता मित्रगुणाः कविभिरवलोकिता ते एव श्लोकबद्धाः सुभाषितमयाश्च सञ्जाताः । मैत्रीभावस्येकः पुण्यप्रवाहः नैरन्तर्येण मम हृत्प्रदेशात् वहेदित्यपि एकेन गुजरातीभाषायाः कविना प्रोक्तं विद्यते । मित्रताधर्मे मित्रधर्मे वा स्थानं प्रधानं न अपि तु परस्परं मानः प्रधानः, प्रीतिः प्रधाना, रागः प्रधानः, निःस्वार्थभावः प्रधानः, औदार्यं

प्रधानम्, हितं प्रधानम्, सत्यं च प्रधानम् अत एव सुभाषितकारेण जगति केन किं वशं भवति तदर्थं प्रोक्तं विद्यते यत्–

**भावेन देवं कलया नरेन्द्रं धनेन कान्तां कपटेन शत्रुम् ।**
**सत्येन मित्रं कृपया च पुत्रं ज्ञानेन लोकं वशमानयन्ति । (सु.र.भा.)**

मित्रं वशं कर्तुं सत्याचरणमेवानिवार्यतत्त्वं बलं वा । मोबाइलकाले तु किमपि इदानीमन्तरमेव नास्ति किन्तु अविद्यमाने मोबाइलयुगेऽपि प्रोक्तं सद्भावे साधुभावे सन्मित्रभावे मित्रधर्मे यः यस्याभिमतः स सदैव तस्य निकट एवास्ति अत्रावसरे मज्ञम प्रियं पद्यं स्मराम्यहं तद्यथा–

**इन्दुः क्व क्व च सागरः क्व च रविः पद्माकरः क्व स्थितः**
**क्वाभ्रं वा क्व मयूरपङ्क्तिरमला क्वालिः क्व वा मालतिः ।**
**मन्दाध्वक्रमराजहंसनिचयः क्वासौ क्व वा मानसं**
**यो यस्याभिमतः स तस्य निकटे दूरेऽपि वा वल्लभः ॥**

मित्रधर्मे आकर्षणं न अपितु समर्पणं सर्वदैव भवति । महादेवे ये गुणाः सन्ति ते एव गुणाः मित्रे स्युः चेदेव मित्रधर्मः पुष्टः भवति । यथा शिवः प्रलयकर्ता तथा मित्रधर्मः दोषसृष्टेः प्रलयकर्ता । यथा शिवः जलधारया तुष्टः तथा मित्रजीवः नेत्रजलेन तुष्टः । शिवः अकिञ्चनः चेत् मित्रजीवः निःस्वार्थभावेन न किञ्चिदपि वाञ्छति । शिवः कुबेरसखः द्वौ सखायौ यत्र एकः जीवः स्वयं शिवस्थाने द्वितीयः औदार्यभावे कुबेरः ।

देवाः बहवः किन्तु महादेवः एक एव तथैव मित्रमपि एकमेव भवतु यथा भर्तुहरिणा प्रोक्तं **'एकं मित्रं भूपतिर्वा यतिर्वा'** शिवः श्मशाने वसति तथैव मित्रधर्मेऽपि स्थानवैभवः नावश्यकः । श्मशानमपि यत्र स्वर्गः भवति सा मैत्री । शिवे गङ्गाप्रवाहः मित्रे रागप्रवाहः, शिवस्य त्रिनेत्रं मित्रधर्मे तृतीयं ज्ञाननेत्रम्, शिवाङ्गे सर्पाः भस्मानि भवन्ति मित्राङ्गे सर्वाः वार्ताः भवन्ति दुःखानां भस्मानि भवन्ति । शिव अर्धनारीनटेश्वरः मित्रधर्मेऽपि शरीरं पृथक् आत्मना अर्धनारीनटेश्वरभावः । शिवः भाषाप्रधानः मित्रधर्मः भावप्रधानः । शिवः मृत्युञ्जयः मित्रजीवोऽपि जन्मजयः मृत्युभयाद् सन्मित्रमेव मोचयति अतः मृत्युञ्जयः । जन्मनः सार्थक्यं मित्रेण भवति अतः जन्मजयः ।

परमात्मनः परमानुग्रहेणैव जीवने सन्मित्रस्य प्राप्तिर्भवति सम्पूर्णे जीवने मानवस्योपरि कस्यचित् सम्बन्धस्य प्रभावः पतति चेत् सः सम्बन्धः मित्रसम्बन्धः । एकः बालकः विद्यालये पञ्चहोरात्मकं कालं यापयति । पित्रोः सान्निध्ये अधिकाधिकं पञ्चहोरात्मकं कालं यापयति किन्तु मित्रस्य सान्निध्ये मित्रस्य चिन्तने वोट्सेप्, फेसबुक्, माध्यमेन अत्यधिकं कालं मित्रधर्माय यापयति । यथा **"मातृदेवो भव"** अस्ति, **"पितृदेवो भव"** अस्ति **"आचार्यदेवो भव"** अस्ति, **"अतिथिदेवो भव"** अस्ति, **"दरिद्रदेवो**

**भव"** अस्ति, तथैव यदि **"मित्रदेवो भव"** चरितार्थं भविष्यति चेत् समाजः सुशीलः, सम्पन्नः, संस्कारपूर्णः, स्वच्छतापूर्णः विकसितो भवतिष्यत्येव ।

इदानीं समये एकः देशः अपि अन्येन देशेन सह मैत्रीभावनायै सम्बन्धं स्थापयितुमुद्युक्तोऽस्ति । समग्रेऽस्मिन् विश्वे जने जने, ग्रामे ग्रामे, नगरे नगरे, राज्ये राज्ये, देशे देशे विश्वासपूर्णः स्वार्थरहितः मित्रभावः प्रकटितः भविष्यति चेदेव **"यत्र विश्वं भवति एकनीडम्"** भविष्यति । स्वभावेन कश्चित् मानवः स्यात् वा दानवः स्यात् किन्तु मित्रस्य आवश्यकता सर्वासु वृत्तिषु भविष्यत्येव न संशयः । एकेन सन्मित्रेण कश्चित् जीवः दानवात् मानवं प्रति मानवात् महामानवं प्रति महामानवात् महापुरुषं प्रति महापुरुषात् सन्तं प्रति एवं सतः भगवन्तं प्रति स्वकीयां यात्रां मङ्गलपूर्णां विधास्यति । अनया यात्रया परिवारोऽपि प्रसन्नः, समाजोऽपि प्रसन्नः, विश्वमपि प्रसन्नं, परमात्मा अपि परितुष्टः भविष्यति ।

अनेन शोधलेखेन भगवन्तं प्रति एकैव प्रार्थना सर्वेषां जीवने नित्यसूर्योदयवत् मित्रोदयः भवेत् तथा चानेन शोधलेखेन कस्यचित् सन्मित्रस्य शोध अपि पूर्णः भवेत् । अहं यादृशं मित्रमिच्छामि तादृशी एव पात्रता सर्वप्रथमं मयि भूयासमिति धिया मम सर्वाण्यपि मित्राणि संस्मृत्य संस्मृत्य सखायं हृदि निधाय शोधविचारान् तस्य हृत्पङ्कजे समर्प्य विरमामि । भगवतः परमानुग्रहेण मयापिजीवने एतादृशः एव मित्रप्रसादः सम्प्राप्तः तेन धन्यतामनुभूय तस्मै मित्राय नमो नमः । यस्मै च -

**हितकर्त्रे च विद्महे गुणवक्त्रे च धीमहि ।**
**तन्नो मित्रं प्रचोदयात् ॥ (स्वस्य)**

**परोक्षे शुभवक्तारं प्रत्यक्षे कटुवादिनम् ।**
**सर्जयेत् तादृशं मित्रं सुधाकुम्भं पयोमुखम् ॥ (स्वस्य)**

**॥ मित्रमहादेवो भव ॥**

**सन्दर्भग्रन्थाः -**

१) सुभाषितरत्नभाण्डागारः ।
२) नीतिशतकम् ।
३) शुक्लयजुर्वेद ।
४) सुभाषितरत्नसागरः ।
५) उपनिषद् सुधा ।

◈◈◈